# श्रीसुरसरस्वतीसभा, शृङ्गेरि

## प्रवेशपरीक्षा

## द्वितीयपत्रिका

दिनाङ्कः – 02-02-2025 अङ्काः – 50

अपराह्ने – 1:30 तः 3:00 पर्यन्तम् समयः – सार्धैकहोरा

सूचना – सर्वाणि उत्तराणि संस्कृतेन एव लेखनीयानि

**1. विषयद्वयं सोदाहरणं विवृणुत ।** **10**

१. सन्नन्तधातुरूपाणि

२. तत्पुरुषसमासः

३. ण्वुल्-तृच्-प्रत्ययौ

**2. विषयद्वयं सोदाहरणं विवृणुत ।** **8**

१. लङ्-लकार-प्रत्ययान्, एकस्य जुहोत्यादिगणधातोः तल्लकारे रूपाणि च लिखत ।

२. "सा रतरागमनायतमानम्" – अत्रत्यं छन्दः सप्रस्तारं सलक्षणं विवृणुत ।

३. "शैला इवोन्नताः सन्तः किन्तु प्रकृतिकोमलाः" – अत्रत्यमलङ्कारं विवृणुत ।

**3. त्रयाणां रूपाणि पुरुषवचनत्रये लिखत ।** **9**

१. रोदिति २. ददौ ३. छिन्ताम्

४. अकरोत् ५. शक्नुयात् ६. क्रेष्यते

**4. चतुर्णाम् अन्यलिङ्गयोः रूपाणि लिखत ।** **4**

१. पठितः २. स्मृतवती ३. गच्छत्

४. सेवकः ५. भर्त्री ६. गेयम्

**5. द्वयोः प्रयोगं व्यत्यस्यत ।** **3**

१. गुरुभिरुपदेशः क्रियते । २. भक्तैः भगवान् वरान् याच्यते ।

३. चोराः धनिकान् धनानि अमुषन् । ४. अहं वस्त्रयुगलम् अक्रीणाम् ।

**6. त्रयाणां विग्रहवाक्यं विलिख्य समासनाम लिखत ।** **6**

| | | |
|---|---|---|
| १. अनुरूपम् | २. सुखप्राप्तः | ३. पञ्चगवम् |
| २. देवब्राह्मणः | ५. पीताम्बरः | ६. पर्यध्ययनः |

**7 मातृभाषया अनुवदत ।** **5**

१. रावणेन अपह्रियमाणा जानकी उपगिरि चतुरः शाखामृगान् ददर्श ।

२. न च मे क्रोधम् उत्स्रष्टुं बुद्धिर्भवति पार्थिव ।

३. सः मासपूर्वः छात्रः विद्यानिपुणः ।

४. मन्दाः महात्मनां चरितं द्विषन्ति ।

५. आनन्दं ब्रह्मणो विद्वान् न बिभेति कदाचन ।

**8 संस्कृतभाषया परिवर्तयत ।** **5**

१. ನನ್ನ ಮಾತುಗಳನ್ನು ಕೇಳು, ಅದರಿಂದ ನೀನು ಸುಖವನ್ನು ಹೊಂದುವೆ.
Listen to my words, by which you will obtain good.

२. ಶ್ರೀರಾಮನು ರಾಕ್ಷಸರ ತಲೆಗಳನ್ನು ಚೂಪಾದ ಬಾಣಗಳಿಂದ ತುಂಡರಿಸಿದನು.
Srirama broke the rakshas's heads into pieces with sharp arrows.

३. ಧರ್ಮರಕ್ಷಕನಾದ ರಾಜನು 'ನಾನು ಪ್ರಜೆಗಳನ್ನು ರಕ್ಷಿಸುತ್ತೇನೆ' ಎಂದು ಪತಿಜ್ಞೆ ಮಾಡುತ್ತಾನೆ.
The king who protects Dharma takes an oath that 'I will protect the subjects'.

४. ಬೆಳಿಗ್ಗೆ ಮತ್ತು ಸಂಜೆ ಎಲ್ಲ ಹಸುಗಳು ನನ್ನಿಂದಲೇ ಹಾಲು ಕರೆಯಲ್ಪಡುತ್ತವೆ.
In the morning and evening, the milk is milked from all the cows by me only.

५. ಉಪಾಧ್ಯಾಯರು ಶಾಲೆಗಳಲ್ಲಿ ಮಕ್ಕಳಿಗೇ ಪಾಠಗಳನ್ನು ಚೆನ್ನಾಗಿ ಬೋಧಿಸಬೇಕು.
Teachers should teach lessons to the students well in the school.

--------------------------